संस्कृत-वार्ता:

दिनाङ्क :- 20.12.2025 प्रात: - 06:55

अथ वार्ता:

पीएम-पश्चिमबंङ्गं

प्रधानमन्त्री नरेन्द्र मोदी अद्य पश्चिमबङ्गं प्रति एष्यति। तस्य यात्रावधौ प्रधानमन्त्री नादियामण्डलस्य रानाघाट् इत्यत्र प्रायः द्विशताधिक त्रिसहस्र कोटिरूप्यकाणां राष्ट्रियराजमार्गपरियोजनाया: शिलान्यासम् उद्घाटनं च करिष्यति। श्री मोदी अवसरेऽस्मिन् सभां च सम्बोधयिष्यति। एता: परियोजनाः कोलकाता-सिलिगुडी इत्येतयोः मध्ये महत्त्वपूर्णं सम्बन्धसूत्रं भविष्यन्ति।

पीएम-असम

पश्चिमबङ्गालतः प्रधानमन्त्री नरेंद्र मोदी अद्य अपराह्णे असमराज्यं प्रति गमिष्यति। एषा यात्रा द्विदिवसात्मिका वर्तते। भ्रमणावधौ श्रीमोदी राज्ये प्रायः षट्शताधिकपञ्चदशसहस्रकोटिरूप्यकाणां विकासपरियोजनानाम् उद्घाटनं शिलान्यासं च करिष्यति। अद्य प्रथमदिवसे प्रधानमन्त्री गुवाहाटी इत्यत्र लोकप्रियो गोपीनाथ बोरदोलोय अन्तर्राष्ट्रीयविमानस्थानके अत्याधुनिक-वेणु-ऑर्किड्-टर्मिनल्-भवनस्य उद्घाटनं करिष्यति। टर्मिनल् "वेणु-ऑर्किड्" इति असमराज्यस्य जैवविविधतां सांस्कृतिकपरम्परां च प्रतिबिम्बयति।

पीएम-डब्ल्यूएचओ

प्रधानमन्त्रिणा नरेन्द्र मोदिना उक्तं यत् योगेन विश्वस्मिन् हि विश्वे स्वास्थ्यस्य, सन्तुलनस्य, च मार्गः प्रदर्शित:। नव दिल्ल्यां विश्व-स्वास्थ्य-सङ्घस्य पारम्परिक-चिकित्सा-विषयक-वैश्विक-सम्मेलने सम्बोधयन् श्री मोदी अवोचत् यत्, योगस्य प्रभावः सर्वत्र एव प्राय: सर्वै: अवलोकित:।

अस्मिन् अवसरे प्रधानमन्त्री, विश्वस्वास्थ्यसङ्गठनस्य महानिदेशकेन डॉ. टेड्रोस् एधनोम् घेब्रेयेसस् इत्यनेन सह देहलीनगरे नूतन विश्वस्वास्थ्यसङ्गठनस्य दक्षिणपूर्व एशिया क्षेत्रीयकार्यालय परिसरस्य उद्घाटनं कृतवान्, यस्मिन् विश्वस्वास्थ्यसङ्गठनस्य भारतस्य कार्यालयः अपि भविष्यति, यत् विश्वस्वास्थ्यसङ्गठनेन सह भारतस्य सहभागितायाः महत्त्वपूर्ण: प्रतीक: अस्ति। प्रधानमन्त्री योगशिक्षणस्य विषये विश्वस्वास्थ्यसङ्गठनस्य प्रतिवेदनं तथा च 'फ्रोम् रूट्स टु ग्लोबल रीच्: ११ इयर्स ऑफ ट्रांसफॉर्मेशन इन आयुष' इति पुस्तकम् अपि प्रकाशितवान्।

सदनावसानम्/लो.स./रा.स.

संसदः उभयसदनयोः शीतकालीनसत्रस्य अनिर्दिष्टकालाय स्थगनमजायत्। लोकसभायाः अध्यक्षः ओम्-बिरला-वर्यः स्वस्य समापनोद्बोधने अवदत् यत् सभायाः उत्पादकता प्रायः एकादशाधिकैकशत- प्रतिशतम् आसीत्। सः अवदत् यत् सभायाः आहत्य पञ्चदश- उपवेशनानि अभवन्। सभायाः सुगमतया सञ्चालने सहकाराय च सः सर्वेभ्यः सदस्येभ्यः धन्यवादान् अयच्छत्।

राज्यसभायाः सभापतिः सी. पी. राधाकृष्णन् वर्यः स्वस्य समापनोद्बोधने अवदत् यत् सभायां प्रायः द्विनवतिहोराः कार्यम् अभवत्, एकविंशत्यधिकैकशत- प्रतिशतञ्च उत्पादकत्वमभवदिति। सः अवदत् यत् सत्रे एकोनषष्टिः स्वायत्तसदस्यानां विधेयकाः प्रस्तुताः सन्ति। सः अवदत् यत् ऐतिहासिक-लोकतान्त्रिक-महत्त्वस्य विषयेषु उच्च-गुणवत्तायुक्तैः वादविवादैः, चर्चया च सत्रमिदं चिह्नितमासीत्। सः अवदत् यत्, राष्ट्रियगीतस्य वंदे मातरम् इत्यस्य सार्धैकशततमे वार्षिकोत्सवावसरे सभायां विशेष-चर्चा अभवत्, यस्मिन् द्व्यशीतिः सदस्याः चर्चायां भागम् अगृह्णन्। सः अवदत् यत् सभायां निर्वाचन-परिष्कारेति विषये अपि चर्चा अभवत् यस्मिन् सप्तपञ्चाशत् सदस्याः देशस्य लोकतान्त्रिक-प्रक्रियायाः सुदृढीकरण-विषये स्वविचारान् पटलं पुरतः स्थापितवन्तः। राज्यसभाप्रमुखः ह्यस्तनीयं कोलाहलमपि समुल्लेखयन् चिन्तां प्रकटितवान्।

**ऋतुविज्ञान**

भारतीय ऋतुविज्ञान -विभागेन अद्य उत्तरप्रदेशे, दिल्ल्यां , छत्तीसगढे , हिमाचलप्रदेशे च अतिनीहारस्य स्थितिं प्रति नारङ्गवर्णीया संचेतना प्रख्यापिता । विभागेन उक्तं यत् बिहार- पञ्जाब , हरियाणा, चण्डीगढ, उत्तराखण्ड, हिमाचलप्रदेश, झारखंडराज्येषु च एतादृशी स्थितिः एव भविष्यति।

**क्रिकेट**

अण्डर्-१९ एशियाकप् क्रिकेट्-क्रीडायां भारतं श्रीलङ्कादेशं दुबई-नगरे प्रथम उपान्त्य स्पर्धायां अष्ट स्तोभैः पराजयत्।

।।इति वार्ता:।।